**B.A. (Honours) Examination 2018**
**Semester - II**
**Sanskrit (Honours)**
**Course : H-3 (Old)**
**(Kumārasambhavam, Raghuvaṁsam)**

**Time : 3 Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. कुमारसम्भवकाव्यस्य पञ्चमसर्गे वर्णितो वृत्तान्तः स्वया सुरगिरा समासेन वर्ण्यताम्। 10

अथवा

महाकवि-कालिदासवर्णितः पार्वत्यास्तपःप्रकारः सरलसंस्कृतभाषया वर्ण्यताम्।

2. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा अनुवदत– 4

(क) कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी।
अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये।।

अथवा

(ख) अथाजिनाषाढधरः प्रगल्भवाग्ज्वलन्निव ब्रह्ममयेन तेजसा।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा।।

3. निम्नोद्धृतयोः श्लोकयोः एकतरस्य प्रसङ्गनिर्देशपूर्वकं संस्कृतेन व्याख्यानं कुरुत– 6

(क) अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्।।

(ख) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।।

4. रघुवंशस्य त्रयोदशसर्गस्य कथावस्तु संक्षेपेण सरलसंस्कृतेन वर्णयत। 10

अथवा

जनस्थानात् पम्पासरोवरं यावत् वर्णितं कथावस्तु सुरगिरा विश्लेषयत।

5. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा अनुवदत– 4

(क) मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः।
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धुः।।

अथवा

(ख) गर्भं दधत्यर्कमरीचयोऽस्माद् विवृद्धिमत्राश्नुवते वसूनि।
अबिन्धनं वह्निमसौ बिभर्त्ति प्रह्लादनं ज्योतिरजन्यनेन।।

P.T.O.

6. प्रसङ्गनिर्देशपुरःसरमेकस्य श्लोकस्य व्याख्या सुरगिरा कार्या— 6

(क) दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला।
आभाति वेला लबणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा।।

(ख) क्वचित् पथा सञ्चरते सुराणां क्वचिद् घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम्।।